
श्रीमद् भागवत का यह सार
भगवद् भक्ति ही आधार

# શ્રી મદ્ભાગવત રસિક કુટુંબ

## કુંતી સ્તુતિ



कुंती स्तुति में है प्रचुर भक्ति, वैराग्य और ज्ञान ।
परम नियंता से मांग रही,दुख देने का वरदान ।।

નારાયણં(ન્) નમસ્કૃત્ય, નરં(ઞ્) ચૈવ નરોત્તમમ્.
દેવીં(મ્) સરસ્વતીં(મ્) વ્યાસં(ન્), તતો જયમુદીરયેત્.
નામસઙ્કીર્તનં(મ્) યસ્ય, સર્વપાપપ્રણાશનમ્.
પ્રણામો દુઃખશમનસ્, તં(ન્) નમામિ હરિં(મ્) પરમ્.

### શ્રીમદ્ભાગવતમહાપુરાણમ્

### પ્રથમઃ સ્કન્ધઃ

### .. અથાષ્ટમોઽધ્યાયઃ ..

સૂત ઉવાચ

અથ તે સમ્પરેતાનાં(મ્), સ્વાનામુદકમિચ્છતામ્ .
દાતું(મ્) સકૃષ્ણા ગઙ્ગાયાં(મ્), પુરસ્કૃત્ય યયુઃ(સ્) સ્ત્રિયઃ .. ૧..

સ્વાના + મુદક + મિચ્ + છતામ્

તે નિનીયોદકં(મ્) સર્વે, વિલપ્ય ચ ભૃશં(મ્) પુનઃ .
આપ્લુતા હરિપાદાબ્જ - રજઃ(ફ્)પૂતસરિજ્જલે .. ૨..

નિની + યોદકં(મ્), રજઃ(ફ્) + પૂત + સરિજ્ + જલે

તત્રાસીનં(ઙ્) કુરુપતિં(ન્), ધૃતરાષ્ટ્રં(મ્) સહાનુજમ્ .
ગાન્ધારીં(મ્) પુત્રશોકાર્તાં(મ્), પૃથાં(ઙ્) કૃષ્ણાં(ઞ્)ચ માધવઃ .. ૩..

પુત્રશો + કાર્તાં(મ્)

સાન્ત્વયામાસ મુનિભિર્ - હતબન્ધૂઞ્શુચાર્પિતાન્ .
ભૂતેષુ કાલસ્ય ગતિં(ન્), દર્શયન્નપ્રતિક્રિયામ્ .. ૪..

સાન્ + ત્વયા + માસ ,
હત + બન્ધૂઞ્ + શુચાર્ + પિતાન્
દર્શયન્ + નપ્રતિ + ક્રિયામ્

સાધયિત્વાજાતશત્રોઃ(સ્), સ્વં(મ્) રાજ્યં(ઙ્)કિતવૈર્હૃતમ્ .
ઘાતયિત્વાસતો રાજ્ઞઃ(ખ્), કચસ્પર્શક્ષતાયુષઃ .. ૫..

કિતવૈર્ + હૃતમ્ , કચસ્પર્શ + ક્ષતાયુષઃ

યાજયિત્વાશ્વમેધૈસ્તં(ન્), ત્રિભિરુત્તમકલ્પકૈઃ .
તદ્યશઃ(ફ્) પાવનં(ન્) દિક્ષુ, શતમન્યોરિવાતનોત્ .. ૬..

યાજયિત્વાશ્ + વમે + ધૈસ્તં(ન્),
ત્રિભિરુત્ + તમકલ્પકૈઃ
શત + મન્યો + રિવા + તનોત્

આમન્ત્ર્ય પાણ્ડુપુત્રાં(વ્)શ્ચ, શૈનેયોદ્ધવસં(ય્)યુતઃ .
દ્વૈપાયનાદિભિર્વિપ્રૈઃ, પૂજિતૈઃ(ફ્) પ્રતિપૂજિતઃ .. ૭..

શૈનેયોદ્ + ધવ + સં(ય્)યુતઃ, દ્વૈપાયના + દિભિર્ + વિપ્રૈઃ

ગન્તું(ઙ્) કૃતમતિર્બ્રહ્મન્, દ્વારકાં(મ્) રથમાસ્થિતઃ .
ઉપલેભેઽભિધાવન્તી - મુત્તરાં(મ્) ભયવિહ્વલામ્ .. ૮..

કૃત + મતિર્ + બ્રહ્મન્, ઉપલેભેઽ + ભિધા + વન્તી
મુત્ + તરાં(મ્) ,ભય + વિહ્ + વલામ્

ઉત્તરોવાચ

પાહિ પાહિ મહાયોગિન્ - દેવદેવ જગત્પતે .
નાન્યં(ન્) ત્વદભયં(મ્) પશ્યે, યત્ર મૃત્યુઃ(ફ્) પરસ્પરમ્ .. ૯..

ત્વદ + ભયં(મ્)

અભિદ્રવતિ મામીશ, શરસ્તપ્તાયસો વિભો .
કામં(ન્) દહતુ માં(ન્) નાથ, મા મે ગર્ભો નિપાત્યતામ્ .. ૧૦..

શરસ્ + તપ્તા + યસો, નિપાત્ + યતામ્

### સૂત ઉવાચ

ઉપધાર્ય વચસ્તસ્યા, ભગવાન્ ભક્તવત્સલઃ .
અપાણ્ડવમિદં(ઙ્) કર્તું(ન્) દ્રૌણેરસ્ત્રમબુધ્યત .. ૧૧..

અપાણ્ડવ + મિદં(ઙ્), દ્રૌણે + રસ્ત્ર + મબુધ્યત

તર્હ્યેવાથ મુનિશ્રેષ્ઠ, પાણ્ડવાઃ(ફ્) પઞ્ચ સાયકાન્ .
આત્મનોઽભિમુખાન્દીપ્તા - નાલક્ષ્યાસ્ત્રાણ્યુપાદદુઃ .. ૧૨..

આત્મનોઽભિ + મુખાન્ + દીપ્તા ,નાલક્ષ્યાસ્ + ત્રાણ્યુ + પાદદુઃ

વ્યસનં(મ્) વીક્ષ્ય તત્તેષા - મનન્યવિષયાત્મનામ્ .
સુદર્શનેન સ્વાસ્ત્રેણ, સ્વાનાં(મ્) રક્ષાં(મ્) વ્યધાદ્વિભુઃ .. ૧૩..

મનન્ય + વિષયાત્ + મનામ્ ,વ્યધાદ્ + વિભુઃ

અન્તઃ(સ્)સ્થઃ(સ્) સર્વભૂતાના - માત્મા યોગેશ્વરો હરિઃ .
સ્વમાયયાઽઽવૃણોદ્ગર્ભં(મ્) વૈરાટ્યાઃ(ખ્) કુરુતન્તવે .. ૧૪..

સ્વમાયયાઽઽ + વૃણોદ્ + ગર્ભં(મ્)

યદ્યપ્યસ્ત્રં(મ્) બ્રહ્મશિરસ્ - ત્વમોઘં(ઞ્) ચાપ્રતિક્રિયમ્ .
વૈષ્ણવં(ન્) તેજ આસાદ્ય, સમશામ્યદ્ ભૃગૂદ્વહ .. ૧૫..

યદ્યપ્ + યસ્ત્રં(મ્), ભૃગૂદ્ + વહ

મા મં(વ્)સ્થા હ્યેતદાશ્ચર્યં(મ્) સર્વાશ્ચર્યમયેઽચ્યુતે .
ય ઇદં(મ્) માયયા દેવ્યા, સૃજત્યવતિ હન્ત્યજઃ .. ૧૬..

સર્વાશ્ચર્ય + મયેઽચ્યુતે, હન્ + ત્યજઃ

બ્રહ્મતેજોવિનિર્મુક્તૈ - રાત્મજૈઃ(સ્) સહ કૃષ્ણયા .
પ્રયાણાભિમુખં(ઙ્) કૃષ્ણ - મિદમાહ પૃથા સતી .. ૧૭..

બ્રહ્મ + તેજો + વિનિર્ + મુક્તૈ, પ્રયાણા + ભિમુખં(ઙ્)

### કુન્ત્યુવાચ

નમસ્યે પુરુષં(ન્) ત્વાઽઽદ્ય - મીશ્વરં(મ્) પ્રકૃતેઃ(ફ્) પરમ્ .
અલક્ષ્યં(મ્) સર્વભૂતાના - મન્તર્બહિરવસ્થિતમ્ .. ૧૮..

મન્તર્ + બહિ + રવસ્થિતમ્

માયાજવનિકાચ્છન્ન - મજ્ઞાધોક્ષજમવ્યયમ્ .
ન લક્ષ્યસે મૂઢદૃશા, નટો નાટ્યધરો યથા .. ૧૯..

માયા + જવનિકાચ્ + છન્ન, મજ્ઞા + ધોક્ષજ + મવ્યયમ્

તથા પરમહં(વ્)સાનાં(મ્), મુનીનામમલાત્મનામ્ .
ભક્તિયોગવિધાનાર્થં(ઙ્), કથં(મ્) પશ્યેમ હિ સ્ત્રિયઃ .. ૨૦..

મુનીના + મમલાત્ + મનામ્ , ભક્તિ + યોગ + વિધા + નાર્થં(ઙ્)

કૃષ્ણાય વાસુદેવાય, દેવકીનન્દનાય ચ .
નન્દગોપકુમારાય, ગોવિન્દાય નમો નમઃ .. ૨૧..

નન્દગોપ + કુમારાય

નમઃ(ફ્) પઙ્કજનાભાય, નમઃ(ફ્) પઙ્કજમાલિને .
નમઃ(ફ્) પઙ્કજનેત્રાય, નમસ્તે પઙ્કજાઙ્ઘ્રયે .. ૨૨..

પઙ્કજાઙ્ + ઘ્રયે

યથા હૃષીકેશ ખલેન દેવકી,
કં(વ્)સેન રુદ્ધાતિચિરં(મ્) શુચાર્પિતા .
વિમોચિતાહં(ઞ્) ચ સહાત્મજા વિભો,
ત્વયૈવ નાથેન મુહુર્વિપદ્ગણાત્ .. ૨૩..

રુદ્ધા + તિચિરં(મ્), મુહુર્ + વિપદ્ + ગણાત્

વિષાન્મહાગ્નેઃ(ફ્) પુરુષાદદર્શના-
દસત્સભાયા વનવાસકૃચ્છ્રતઃ .
મૃધે મૃધેઽનેકમહારથાસ્ત્રતો,
દ્રૌણ્યસ્ત્રતશ્ચાસ્મ હરેઽભિરક્ષિતાઃ .. ૨૪..

વિષાન્ + મહાગ્નેઃ(ફ્), વનવાસ + કૃચ્ + છ્રતઃ
મૃધેઽનેક + મહા+ રથાસ્ + ત્રતો, દ્રૌણ્યસ્ + ત્રતશ્ + ચાસ્મ

વિપદઃ(સ્) સન્તુ નઃ(શ્) શશ્વત્ - તત્ર તત્ર જગદ્ગુરો .
ભવતો દર્શનં(મ્) યત્સ્યા - દપુનર્ભવદર્શનમ્ .. ૨૫..

દપુનર્ + ભવદર્શનમ્

જન્મૈશ્વર્યશ્રુતશ્રીભિ - રેધમાનમદઃ(ફ્) પુમાન્ .
નૈવાર્હત્યભિધાતું(મ્) વૈ, ત્વામકિઞ્ચનગોચરમ્ .. ૨૬..

જન્મૈશ્ + વર્ય + શ્રુત + શ્રીભિ, નૈવાર્ + હત્યભિ + ધાતું(મ્)
ત્વા + મકિઞ્ચ + નગોચરમ્

નમોઽકિઞ્ચનવિત્તાય, નિવૃત્તગુણવૃત્તયે .
આત્મારામાય શાન્તાય, કૈવલ્યપતયે નમઃ .. ૨૭..

નમોઽ + કિઞ્ચન + વિત્ + તાય, નિવૃત્ + તગુણ + વૃત્ + તયે

મન્યે ત્વાં(ઙ્) કાલમીશાન - મનાદિનિધનં(મ્) વિભુમ્ .
સમં(ગ્) ચરન્તં(મ્) સર્વત્ર, ભૂતાનાં(મ્) યન્મિથઃ(ખ્) કલિઃ .. ૨૮..

મના + દિનિધનં(મ્)

ન વેદ કશ્ચિદ્ભગવં(વ્)શ્ચિકીર્ષિતં(ન્)
તવેહમાનસ્ય નૃણાં(મ્) વિડમ્બનમ્ .
ન યસ્ય કશ્ચિદ્દયિતોઽસ્તિ કર્હિચિદ્,
દ્વેષ્યશ્ચ યસ્મિન્ વિષમા મતિર્નૃણામ્ .. ૨૯..

કશ્ચિદ્ + ભગવં(વ્)શ્  + ચિકીર્ષિતં(ન્)
કશ્ચિદ્ + દયિતોઽસ્તિ , કર્ + હિચિદ્

જન્મ કર્મ ચ વિશ્વાત્મન્ -  નજસ્યાકર્તુરાત્મનઃ .
તિર્યઙ્નૃર્ષિષુ યાદઃ(સ્)સુ, તદત્યન્તવિડમ્બનમ્ .. ૩૦..

તિર્યઙ્નૃ + ર્ષિષુ, તદત્ + યન્ત + વિડમ્ + બનમ્

ગોપ્યાદદે ત્વયિ કૃતાગસિ દામ તાવદ્
યા તે દશાશ્રુકલિલાઞ્જનસમ્ભ્રમાક્ષમ્ .
વક્ત્રં(ન્) નિનીય ભયભાવનયા સ્થિતસ્ય
સા માં(મ્) વિમોહયતિ ભીરપિ યદ્બિભેતિ .. ૩૧..

દશા + શ્રુકલિ + લાઞ્જન + સમ્ભ્ર + માક્ષમ્ ,યદ્ + બિભેતિ

કેચિદાહુરજં(ગ્) જાતં(મ્), પુણ્યશ્લોકસ્ય કીર્તયે .
યદોઃ(ફ્) પ્રિયસ્યાન્વવાયે, મલયસ્યેવ ચન્દનમ્ .. ૩૨..

પુણ્યશ્ + લોકસ્ય, પ્રિયસ્ + યાન્ + વવાયે

અપરે વસુદેવસ્ય, દેવક્યાં(મ્) યાચિતોऽભ્યગાત્ .
અજસ્ત્વમસ્ય ક્ષેમાય, વધાય ચ સુરદ્વિષામ્ .. ૩૩..

અજસ્ + ત્વમસ્ય ,સુરદ્ + વિષામ્

ભારાવતારણાયાન્યે, ભુવો નાવ ઇવોદધૌ .
સીદન્ત્યા ભૂરિભારેણ, જાતો હ્યાત્મભુવાર્થિતઃ .. ૩૪..

હ્યાત્મ + ભુવાર્ + થિતઃ

ભવેऽસ્મિન્ ક્લિશ્યમાનાના - મવિદ્યાકામકર્મભિઃ .
શ્રવણસ્મરણાર્હાણિ, કરિષ્યન્નિતિ કેચન .. ૩૫..

ક્લિશ્ય + માનાના, શ્રવણસ્ + મરણાર્ + હાણિ, કરિષ્યન્ + નિતિ

શૃણ્વન્તિ ગાયન્તિ ગૃણન્ત્યભીક્ષ્ણશઃ(સ્)
સ્મરન્તિ નન્દન્તિ તવેહિતં(ઞ્) જનાઃ .
ત એવ પશ્યન્ત્યચિરેણ તાવકં(મ્)
ભવપ્રવાહોપરમં(મ્) પદામ્બુજમ્ .. ૩૬..

ગૃણન્ત્ય + ભીક્ષ્ણશઃ(સ્), પશ્યન્ત્ય + ચિરેણ , ભવ + પ્રવાહો + પરમં(મ્)

અપ્યદ્ય નસ્ત્વં(મ્) સ્વકૃતેહિત પ્રભો,
જિહાસસિ સ્વિત્સુહૃદોऽનુજીવિનઃ .
યેષાં(ન્) ન ચાન્યદ્ભવતઃ(ફ્) પદામ્બુજાત્,
પરાયણં(મ્) રાજસુ યોજિતાં(વ્)હસામ્ .. ૩૭..

સ્વિત્ + સુહૃદોऽ + નુજીવિનઃ, ચાન્યદ્ + ભવતઃ(ફ્)

કે વયં(ન્) નામરૂપાભ્યાં(મ્), યદુભિઃ(સ્) સહ પાણ્ડવાઃ .
ભવતોऽદર્શનં(મ્) યર્હિ, હૃષીકાણામિવેશિતુઃ .. ૩૮..

હૃષી + કાણા + મિવેશિતુઃ

નેયં(મ્) શોભિષ્યતે તત્ર, યથેદાનીં(ઙ્) ગદાધર .
ત્વત્પદૈરઙ્કિતા ભાતિ, સ્વલક્ષણવિલક્ષિતૈઃ .. ૩૯..

ત્વત્ + પદૈ + રઙ્કિતા, સ્વ + લક્ષણ + વિલક્ષિતૈઃ

ઇમે જનપદાઃ(સ્) સ્વૃદ્ધાઃ(સ્), સુપક્વૌષધિવીરુધઃ .
વનાદ્રિનદ્યુદન્વન્તો, હ્યેધન્તે તવ વીક્ષિતૈઃ .. ૪૦..

સુપક્ + વૌષધિ + વીરુધઃ, વનાદ્રિ + નદ્યુદન્ + વન્તો

અથ વિશ્વેશ વિશ્વાત્મન્, વિશ્વમૂર્તે સ્વકેષુ મે .
સ્નેહપાશમિમં(ઞ્) છિન્ધિ, દૃઢં(મ્) પાણ્ડુષુ વૃષ્ણિષુ .. ૪૧..

સ્નેહ + પાશ + મિમં(ઞ્) + છિન્ધિ

ત્વયિ મેઽનન્યવિષયા, મતિર્મધુપતેઽસકૃત્ .
રતિમુદ્વહતાદદ્ધા, ગઙ્ગેવૌઘમુદન્વતિ .. ૪૨..

મતિર્ + મધુપતેઽ + સકૃત્ , રતિ + મુદ્ + વહતા + દદ્ધા
ગઙ્ગે + વૌઘ + મુદન્વતિ

શ્રીકૃષ્ણ કૃષ્ણસખ વૃષ્ણ્યૃષભાવનિધ્રુગ્-
રાજન્યવં(વ્)શદહનાનપવર્ગવીર્ય .
ગોવિન્દ ગોદ્વિજસુરાર્તિહરાવતાર,
યોગેશ્વરાખિલગુરો ભગવન્નમસ્તે .. ૪૩..

વૃષ્ણ્યૃષભા + વનિધ્રુગ્ , રાજન્ + યવં(વ્)શ + દહના + નપવર્ગ + વીર્ય
ગોદ્વિજ + સુરાર્ + તિહરા + વતાર ,યોગેશ્વરા + ખિલગુરો

સૂત ઉવાચ

પૃથયેત્થં(ઙ્) કલપદૈઃ(ફ્), પરિણૂતાખિલોદયઃ .
મન્દં(ઞ્) જહાસ વૈકુણ્ઠો, મોહયન્નિવ માયયા .. ૪૪..

પરિણૂતા + ખિલોદયઃ, મોહયન્ + નિવ

તાં(મ્) બાઢમિત્યુપામન્ત્ર્ય, પ્રવિશ્ય ગજસાહ્વયમ્ .
સ્ત્રિયશ્ચ સ્વપુરં યાસ્યન્, પ્રેમ્ણા રાજ્ઞા નિવારિતઃ .. ૪૫..

બાઢમિત્ + યુપા + મન્ત્ર્ય , ગજસાહ્ + વયમ્

વ્યાસાદ્યૈરીશ્વરેહાજ્ઞૈઃ(ખ્), કૃષ્ણેનાદ્ભુતકર્મણા .
પ્રબોધિતોઽપીતિહાસૈર્ - નાબુધ્યત શુચાર્પિતઃ .. ૪૬..

વ્યાસા + દ્યૈરીશ્ + વરેહાજ્ઞૈઃ(ખ્), કૃષ્ણેનાદ્ + ભુતકર્મણા
પ્રબોધિતોઽ + પીતિ + હાસૈર્

આહ રાજા ધર્મસુતશ્ - ચિન્તયન્ સુહૃદાં(મ્) વધમ્ .
પ્રાકૃતેનાત્મના વિપ્રાઃ(સ્), સ્નેહમોહવશં(ઙ્) ગતઃ .. ૪૭..

પ્રાકૃતે + નાત્મના , સ્નેહ + મોહ + વશં(ઙ્)

અહો મે પશ્યતાજ્ઞાનં(ન્), હૃદિ રૂઢં(ન્) દુરાત્મનઃ .
પારક્યસ્યૈવ દેહસ્ય, બહ્વ્યો મેઽક્ષૌહિણીર્હતાઃ .. ૪૮..

પારક્ + યસ્યૈવ ,મેઽક્ષૌ + હિણીર્ + હતાઃ

બાલદ્વિજસુહૃન્મિત્ર - પિતૃભ્રાતૃગુરુદ્રુહઃ .
ન મે સ્યાન્નિરયાન્મોક્ષો, હ્યપિ વર્ષાયુતાયુતૈઃ .. ૪૯..

બાલદ્વિજ + સુહૃન્મિત્ર, પિતૃ + ભ્રાતૃ + ગુરુદ્રુહઃ

સ્યાન્ + નિરયાન્ + મોક્ષો

નૈનો રાજ્ઞઃ(ફ્) પ્રજાભર્તુર્ - ધર્મયુદ્ધે વધો દ્વિષામ્ .
ઇતિ મે ન તુ બોધાય, કલ્પતે શાસનં(મ્) વચઃ .. ૫૦..

પ્રજા + ભર્તુર્

સ્ત્રીણાં(મ્) મદ્ધતબન્ધૂનાં(ન્), દ્રોહો યોઽસાવિહોત્થિતઃ .
કર્મભિર્ગૃહમેધીયૈર્ - નાહં(ઙ્) કલ્પો વ્યપોહિતુમ્ .. ૫૧..

મદ્ + ધત + બન્ધૂનાં(ન્), યોઽસાવિ + હોત્થિતઃ

કર્મભિર્ + ગૃહ + મેધીયૈર્

યથા પઙ્કેન પઙ્કામ્ભઃ(સ્), સુરયા વા સુરાકૃતમ્ .
ભૂતહત્યાં(ન્) તથૈવૈકાં(ન્), ન યજ્ઞૈર્માર્ષ્ટુમર્હતિ .. ૫૨..

યજ્ઞૈર્ + માર્ષ્ટુ + મર્હતિ

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે પારમહં(વ્)સ્યાં(મ્) સં(વ્)હિતાયાં(મ્)
પ્રથમસ્કન્ધે કુન્તીસ્તુતિર્યુધિષ્ઠિરાનુતાપો નામાષ્ટમોઽધ્યાયઃ .. ૮..

ૐ પૂર્ણમદઃ(ફ્) પૂર્ણમિદં(મ્) પૂર્ણાત્પૂર્ણમુદચ્યતે

પૂર્ણસ્ય પૂર્ણમાદાય પૂર્ણમેવાવશિષ્યતે.

ૐ શાન્તિઃ(શ્) શાન્તિઃ(શ્) શાન્તિઃ.